National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 173-178
© 2026 NJHSR
www.sanskritarticle.com

**Sundram Mishra**
Research Scholar,
Shri Lal Bahadur Shastri National-Sanskrit University, New Delhi

**शोध निर्देशक**
**Dr.Naresh Kumar Bairwa**
Associate Professor,
Shri Lal Bahadur Shastri National-Sanskrit University, New Delhi-16

**Correspondence:**
**Sundram Mishra**
Research Scholar,
Shri Lal Bahadur Shastri National-Sanskrit University, New Delhi

# श्रीदुर्गासप्तशत्याः प्रथमचरित्रस्य दार्शनिको विमर्शः

*(A Philosophical Enquiry into the First Carita of the Śrī Durgā-Saptaśatī)*

**Sundram Mishra, Dr.Naresh Kumar Bairwa**

**शोधसारः (Abstract)**

श्रीदुर्गासप्तशत्याः प्रथमं चरित्रं 'मधुकैटभवधः' इति नाम्ना प्रसिद्धम्। तद् दैवीशक्तेराद्यं स्वरूपं, सृष्टेर्मूलभूतं विवेकतत्त्वं, ब्रह्मविद्यायाश्च गूढं रहस्यम् उद्घाटयति। एतच्चरित्रं न केवलं पौराणिकम् आख्यानम्, अपि तु अद्वैतवेदान्ते श्रीमद्भगवद्गीतायाम् उपनिषत्सु च प्रतिपादितानाम् आत्मब्रह्मैक्य-मायाविवेक-सत्त्वप्रकाशादीनां सिद्धान्तानां गम्भीरं निरूपणम्। प्रस्तुते शोधपत्रे प्रथमचरित्रे निहितानां प्रतीकानां तत्त्वानां दार्शनिकार्थसूत्राणां च वेदान्तदृष्ट्या विश्लेषणं क्रियते। अस्मिंश्चरित्रे वर्णितानां महामाया-योगनिद्रा-मधुकैटभ-भगवद्विष्णूनां प्रातीकिकस्वरूपस्य तात्त्विकविवेचनद्वारा सृष्टिप्रक्रियाया मायातत्त्वस्य ज्ञानस्य च परस्परसम्बन्धः प्रकाश्यते। एवं प्रथमं चरित्रं शक्तितत्त्वस्य आध्यात्मिकदर्शनस्य च महत्त्वपूर्णं प्रवेशद्वारम् इति प्रतिपाद्यते।

**मुख्यशब्दाः (Keywords)**

महामाया, योगनिद्रा, मधुकैटभवधः, अविद्या, आवरणविक्षेपशक्ती, पराविद्या, तमोगुणः, अद्वैतवेदान्तः, देवीमाहात्म्यम्, प्रतीकविमर्शः।

## १. भूमिका

सम्पूर्णः श्रीदुर्गासप्तशतीग्रन्थो भगवत्या आदिशक्तेः श्रीदुर्गायाश्चरित्रत्रये—प्रथमचरित्रे, मध्यमचरित्रे, उत्तमचरित्रे च—विभक्तः।[1] एतानि त्रीणि चरित्राणि कालातीतेन दार्शनिककथासूत्रेण परस्परं सम्बद्धानि। सम्पूर्णा कथा त्रयोदशस्वध्यायेषु विभक्ता, येषु भगवत्याः शक्तेर्विविधानां स्वरूपाणां, तदाश्रितानां तत्त्वानां, दैव्यासुरीणां च प्रवृत्तीनां दार्शनिकं स्वरूपं निरूप्यते।

प्रथमं चरित्रं तमोगुणस्याधिष्ठात्र्या देव्याः श्रीमहाकाल्याः स्वरूपं प्रतिपादयति। सा महामाया स्वशक्त्या सम्पूर्णं चराचरं जगन्मोहयति। तस्याः प्रभावादेव समस्तं जगन्मोहपाशेन बद्धं भवति। देवा मनुष्या अन्ये च प्राणिनस्तस्या मायाशक्तेः प्रभावात् स्वस्वरूपविस्मृतिं प्राप्नुवन्ति। अत एवात्र महामायाया मोहशक्तेः, योगनिद्रायाः, तस्या आवरणात्मकस्वरूपस्य च दार्शनिकं निरूपणं विशेषतो दृश्यते—

**महामाया हरेश्चैषा तया सम्मोह्यते जगत्।**
**ज्ञानिनामपि चेतांसि देवी भगवती हि सा॥**
**बलादाकृष्य मोहाय महामाया प्रयच्छति।** (१.५५-५६)[2]

अस्य चरित्रस्य मूलप्रसङ्गे भगवतो विष्णोर्योगनिद्रास्थितिः, ततो ब्रह्मणः स्तुत्या महामायायाः प्रबोधनम्, मधुकैटभयोराविर्भावः, अन्ते च तयोर्वध इत्येते प्रसङ्गा वर्णिताः। एतेषां

पौराणिकप्रसङ्गानाम् अन्तर्निहितं दार्शनिकं तत्त्वं माया-चेतना-निद्रा-ज्ञान-सृष्टिप्रक्रियाणां परस्परसम्बन्धं प्रकाशयति। अतः प्रथमं चरित्रं न केवलं मधुकैटभवधस्याख्यानम्, अपि तु शक्तितत्त्वस्य सृष्टे-राद्यावस्थायाश्च गूढदार्शनिकव्याख्यानरूपेणापि अवगन्तुं शक्यते।

## २. श्रीदुर्गासप्तशती मोक्षशास्त्ररूपेण

भारतीयदर्शनवाङ्मयस्योच्चतमं शिखरं वेदान्तः, यस्य प्रस्थानत्रयम् उपनिषदः, श्रीमद्भगवद्गीता, ब्रह्मसूत्रं चेति। वेदान्तस्य मुख्यं लक्ष्यं मोक्षस्य निर्वाणस्य कैवल्यस्य वा प्राप्तिः। अधोलिखितैः प्रमाणैर्मोहाहङ्कारजनितेभ्यो दुःखेभ्यो मुक्तिरूपस्य लक्ष्यस्य पुष्टिर्भवति—

**"अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।"**[3]

अर्थात् अविद्यायां वर्तमानो मनुष्यः परिभ्रमति; इदमेव दुःखस्य मूलं कारणम्।

**"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। ... तस्यैष आत्मा विवृणुते तनूं स्वाम्॥"**[4]

अर्थात् आत्मनः सत्यज्ञानप्राप्त्यैव वास्तविकी दुःखशान्तिः सम्भवति।

**"तमेव विदित्वाति मृत्युमेति।"**[5]

अर्थात् ब्रह्मज्ञानेनैव मृत्युम् अतिक्रम्य सर्वदुःखेभ्यः पारं गन्तुं शक्यते।

**"यो वै भूमा तत्सुखम्।"**[6]

अर्थात् सीमितानि वस्तूनि दुःखं जनयन्ति; ब्रह्म तु 'भूमा' सत् अनन्तसुखस्वरूपम्।

**"आनन्दो ब्रह्मेति व्यजानात्।"**[7]

अर्थात् ब्रह्मैवानन्दस्वरूपम्; ब्रह्मज्ञाने स्थितः पुरुषो दुःखात् परं गच्छति।

**"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।"**[8]

अर्थात् मनसः समत्वावस्था दुःखान्मुक्तेः प्रथमं सोपानम्।

**"न जायते म्रियते वा कदाचित् ... न हन्यते हन्यमाने शरीरे।"**[9]

अर्थात् आत्माजरामरः; अनेन ज्ञानेन भयशोकदुःखानां नाशो भवति।

**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।"**[10]

अर्थात् फलासक्तिरेव दुःखस्य कारणम्; निष्कामकर्मणा मनः स्वतन्त्रं भवति।

**"अथातो ब्रह्मजिज्ञासा।"**[11]

**"जन्माद्यस्य यतः।"**[12]

अर्थात् यावन्मनुष्यः कारणतत्त्वादपरिचितस्तावद्दुःखं विद्यते; कारणब्रह्मणो ज्ञानमेव मुक्तिं प्रयच्छति।

**"आनन्दमयोऽभ्यासात्।"**[13]

अर्थात् औपनिषदप्रमाणानाम् आधारेण ब्रह्मानन्दस्वरूपम्; तत्प्राप्त्या दुःखरहितावस्था लभ्यते।

**"तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्।"**[14]

अर्थात् अविद्यानाशेन संसारसंयोगस्य नाशो भवति, स एव हानम् अर्थात् मोक्षः।

**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥"**[15]

अर्थात् ब्रह्मविद्याप्राप्त्या जीवो ब्रह्मस्वरूपे प्रतिष्ठितः सन् दुःखान्मुक्तो भवति।

श्रीदुर्गासप्तशत्यामपि केन्द्रबिन्दुर्मोहजनितेभ्यो दुःखेभ्यो मुक्तिरेव। सा च मुक्तिर्नित्यस्वरूपिण्या भगवत्या महामायायाः शरणागत्यैव प्राप्तुं शक्यते।

## ३. प्रथमचरित्रस्य दार्शनिकं स्वरूपम्

देवीमाहात्म्यं दुर्गासप्तशती वा मार्कण्डेयपुराणान्तर्गते सावर्णिके मन्वन्तरे कथारूपेण प्रस्तुतम्। परम्परया चेदं त्रिचरित्रात्मकं ग्रन्थस्वरूपं मन्यते—प्रथमचरित्रं महाकाली, मध्यमचरित्रं महालक्ष्मीः, उत्तमचरित्रं महासरस्वती चेति। प्रस्तुते शोधपत्रे तेषु प्रथमस्य चरित्रस्य विमर्शः क्रियते, यत्परम्परायां 'मधुकैटभवधः' इति नाम्ना प्रसिद्धस्य प्रथमाध्यायस्य रूपेण ज्ञायते।

स्थूलदृष्ट्यावलोक्यमानः स प्रसङ्ग इतिहासाख्यानमिव प्रतिभाति—राज्यभ्रष्टः कश्चिद् राजा, विश्वासघातेन पीडितः कश्चिद् वैश्यः, वनवासी ऋषिः, अन्ते च कस्यचिदसुरस्य वधकथेति। किन्तु सूक्ष्मतया पाठे विमृश्यमाने स्पष्टं भवति यदिदमाख्यानं वस्तुतः सुव्यवस्थितायाः दार्शनिकसंरचनायाः केवलमावरणमात्रम्, यस्यान्तर्भागे मायाप्रकृतिब्रह्मशक्तीनां सम्बन्धविषयका अत्यन्त-सूक्ष्माः सिद्धान्ताः समाहिताः।

प्रस्तुते शोधविवेचने तस्मिन्नाख्यानात्मके आवरणे निहितं दार्शनिकं स्वरूपं श्लोकप्रमाणानामाधारेणोद्घाटयितुं प्रयासः क्रियते।

## ४. ध्यानश्लोकेऽन्तर्निहिता तात्त्विकी संरचना

अध्यायस्यारम्भे एव यो ध्यानश्लोकः प्राप्यते, स आकस्मिकोऽलङ्कारो न भवति, अपि तु सम्पूर्णस्य चरित्रस्य दार्शनिकी कुञ्जिकैव। अस्मिन् प्रथमे चरित्रे विनियोगक्रमेण ऋषिर्ब्रह्मा, देवता महाकाली, छन्दो गायत्री, शक्तिर्नन्दा, बीजं रक्तदन्तिका, तत्त्वमग्निः, स्वरूपं चर्ग्वेद इति निर्दिष्टानि। ऋषिच्छन्दोदेवतात्रयं वस्तुतो वैदिकमन्त्रशास्त्रस्यैव सा संरचना, यया प्रत्येको मन्त्रो ज्ञानस्य शब्दस्य च स्वायत्तसाधनरूपेण प्रतिष्ठाप्यते। अस्यां संरचनायां देव्याः प्रतिष्ठापनस्यायमभिप्रायो यत्सा कस्याश्चित्कथाया अन्तर्गतं केवलं पात्रमात्रं न, अपि तु तेन सम्पूर्णेन साधनतन्त्रेण सह तादात्म्यं धारयति, येन वेदः स्वयं ज्ञानरूपेण कार्यं करोति।

अस्मिन्नेव सन्दर्भे तस्या दशसु हस्तेषु खड्गचक्रगदा-बाणधनुःपरिघशूलभुशुण्डिमस्तकशङ्खानां धारणं, त्रिनयनत्वं, दशवक्त्रत्वं, दशपादत्वं च वर्णितम्। अत्र सङ्ख्यात्मिका बहुलता

(दश, त्रि) पूर्णताया सार्वभौमिकतायाश्च प्रतीकरूपेण स्थित्वा प्रत्येकमायुधं पृथक् कारणशक्तिरूपेण प्रतिपादयति। अनेन देवी सृष्टेः सम्पूर्णसाधनव्यवस्थाया अधीश्वरीरूपेण प्रतिष्ठिता भवति।

**५. सुरथसमाध्योः कथायां ज्ञानमीमांसात्मकं मोहविवेचनम्**

राज्ञः सुरथस्य मन्त्रिभिश्छलनं वैश्यस्य समाधेश्च स्वजनैरेव परित्यागः—उभौ प्रसङ्गौ संरचनादृष्ट्या समानान्तरौ स्तः। उभावपि चैनं प्रश्नमुत्थापयतो यज्ज्ञात्वापि ममताया बन्धनं किमर्थं न शिथिलीभवतीति।

**दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना।**
**ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि॥** (१.४१)[16]
**जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम।**
**अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः॥** (१.४२)[17]
**स्वजनेन च सन्त्यक्तस्तेषु हार्दी तथाप्यति।**
**एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ॥** (१.४३)[18]
**दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ।**
**तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि॥** (१.४४)[19]
**ममास्य च भवत्येषा विवेकान्धस्य मूढता॥** (१.४५)[20]

अस्य प्रश्नस्योत्तरं ददन्मेधा मुनिर्यं दृष्टान्तमुपस्थापयति, स विशुद्धतया ज्ञानमीमांसात्मक एव—पतङ्गाः क्षुधया पीड्यमाना अपि मोहवशात् स्वशावकानां चञ्चुष्वन्नकणान् क्षिपन्ति; मनुष्याश्च ज्ञानिनोऽपि लोभात् प्रत्युपकाराभिलाषेण सन्तानम् इच्छन्ति।

**यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः।**
**ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम्॥** (१.५०)[21]
**मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः।**
**ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु॥** (१.५१)[22]
**कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा।**
**मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति॥** (१.५२)[23]
**लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि।**
**तथापि ममतावर्ते मोहगर्ते निपातिताः॥** (१.५३)[24]

अस्य दृष्टान्तस्य माध्यमेनायं सिद्धान्तः प्रतिपाद्यते यत्केवलया विवेकस्य बुद्धेर्वोपस्थित्या मोहस्य निवारणं न भवति। मनुष्याणां पशुपक्षिणां च बोधे गुणात्मको भेदो नास्तीति ऋषिणा स्पष्टमुक्तम्।

अपि च मोहो न बुद्धेरभावमात्रम्, अपि तु बुद्धेरपि मूलभूताया महामायाया अधीनो व्यापार इति प्रतिपाद्यते, या ज्ञानिनामपि चित्तं बलादाकृष्य मोहयति।[25] अस्मिन् सन्दर्भे साङ्ख्यवेदान्तसम्मतस्य तस्य सिद्धान्तस्य पूर्वाभासः प्रतीयते, यदविद्या माया वा अनादिः स्वायत्ता च सत्ता वर्तते, या केवलया लौकिक्या बुद्ध्या न, अपि तूच्चतरेण ज्ञानेनानुग्रहेण वा शिथिलीभवति।

**६.महामायायास्तात्त्विकी प्रतिष्ठा—योगनिद्रा, त्रिविधं कार्यं, पराविद्या च**

मेधसो मुनेरुत्तररूपेण महामायाया यत्स्वरूपं प्रस्तूयते, तद्भगवतो विष्णोर्योगनिद्रारूपेण—अर्थात्तस्य स्वकीयशक्तिरूपेण, तेनाभिन्ना सत्यपि स्वतन्त्रकर्तृत्वसम्पन्ना—वर्णितम्।

सा संसारस्य स्थितिम्, अर्थाज्जन्ममरणपरम्परां, धारयतीति कथ्यते; प्रसन्ना च सती मुक्तेर्वरदात्री भवति। इदं द्वैविध्यमत्यन्तं महत्त्वपूर्णम्—सा बन्धनस्य मोक्षस्य चोभयोर्हेतुभूता युगपत्प्रतिपादिता—

**सैषा प्रसन्ना वरदा नृणां भवति मुक्तये।**
**सा विद्या परमा मुक्तेर्हेतुभूता सनातनी॥**
**संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी॥** (१.५७-५८)[26]

परम्परागते वेदान्ते पराविद्याया ब्रह्मज्ञानस्य अपराविद्यायाश्च लौकिकज्ञानस्य यो विभागः प्रचलितः, अत्र देवी तस्माद्विभागादपि परा सती उभयोरेकीकृतोद्गमस्थलरूपेण प्रस्तुता।[27]

अस्मिन्नेव प्रसङ्गे तां 'सर्वेश्वरेश्वरी' इति कथयता ग्रन्थकारेण त्रिमूर्तिसहिताः समस्ता ईश्वरीयाः सत्तास्तस्या अधीना इति स्थापितम्। ब्रह्मा स्वयमेव स्तौति—'विष्णुः शरीरग्रहणमहमीशान एव च। कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥'[28]

**७.मधुकैटभयोरुत्पत्तिः—तमोगुणस्य रूपकम् अव्यक्तावस्थायां सुप्तासुरता च**

कल्पान्ते एकार्णवावस्थायाम्—अर्थात् सृष्टेरव्यक्तायामविभक्तायां प्रकृत्यवस्थायाम्—भगवान् विष्णुः शेषशय्यायां योगनिद्रायां शयनं कुर्वन्नासीत्। तस्मिन्नेव समये तस्य कर्णमलान्मधुकैटभनामानावसुरावुत्पन्नाविति दार्शनिकदृष्ट्यात्यन्तं सूचकम्।[29] अनयोरसुरयोरुद्भवो न कुतश्चिद् बाह्यात्स्रोतसः, अपि तु साक्षात्परमपुरुषस्य शरीरमलादभवत्। एतद्दर्शयति यत्तामस्यः प्रवृत्तयः सृष्टेरव्यक्ते बीजरूपे कालेऽपि गूढरूपेण विद्यमाना भवन्ति। अर्थाद् गुणत्रये तमोगुणस्यांशोऽव्यक्तायामपि प्रकृतौ बीजरूपेण सदैवान्तर्निहितस्तिष्ठति, अभिव्यक्तेः प्रथमक्षणे एव च प्रकटो भवति।

ब्रह्मणो विष्णोर्नाभिकमले स्थितिस्तथा चासुराभ्यां भीतस्य तस्य योगनिद्रायाः स्तवनम्[30] इदं तथ्यं रेखाङ्कयति यत्सृष्टिकर्तुर्ब्रह्मणोऽपि सत्तान्ततस्तस्या एव शक्तेराश्रिता, या पालकं विष्णुमपि निद्रायां स्थापयति।

**८. मधुकैटभवधस्य आध्यात्मिकः प्रतीकार्थः**

पञ्चवर्षसहस्रपर्यन्तं प्रवृत्तं बाहुयुद्धम्[31], तदनन्तरं चासुराभ्यां वरदानप्रस्तावः[32], यं भगवान् विष्णुः परिवर्त्य स्वयमेव तयोर्वधयाचनारूपेण परिणमयति[33], पूर्वखण्डे मुनिना निरूपितस्य

महामायाया मोहकारिणः प्रभावस्य प्रत्यक्षं प्रदर्शनम्। अत्र स्वयमसुरावपि मोहवशात् स्वविनाशस्यैव याचनां कुरुतः।

तदनन्तरं जलरहिते स्थाने वधस्य तयोः शर्तः[34], भगवता विष्णुना च तयोर्मस्तकयोः स्वजघने निधाय चक्रेण छेदनम्[35] अपि विशेषतयोल्लेखनीयम्। वधस्थानं न जलम्, न पृथिवी, अपि तु स्वयं भगवतः शरीरमेव। एतदेवं द्रष्टुं शक्यते यत् तामस्योऽहङ्कारप्रेरिताश्च शक्तयो न बाह्येन साधनेन विनश्यन्ति, अपि तु तस्मिन्नेव चेतनतत्त्वे पुनर्लयं यान्ति, यस्मात्ता मूलत उद्‌भूता आसन्। अतः संहारो वस्तुतः स्वमूलस्रोतसि पुनर्लयनस्यैव प्रक्रिया।

## ९. अद्वैतवेदान्तदृष्ट्या प्रातीकिको विमर्शः

### ९.१ शक्तिर्ब्रह्मणः स्वाभाविकः स्पन्दः

उपनिषत्सु ब्रह्मैकरसं चैतन्यमिति कथितम्—'अथात आदेशो नेति नेति'।[36] किन्तु संसारस्य क्रिया शक्तितत्त्वेनैव सम्भवति। देव्याः प्रथमचरित्रे विष्णोर्योगनिद्रारूपेण सैव शक्तिर्वर्तते, या वेदान्ते मायाशक्तिरिति कथ्यते।

### ९.२ योगनिद्रायाः अर्थः—मायाया आवरणम्

अद्वैतसिद्धान्ते माया अज्ञानरूपा सती आवरणविक्षेपलक्षणाभ्यां द्वाभ्यां शक्तिभ्यां कार्यं करोति।[37] यदैषा निवर्तते, तदा 'तदा द्रष्टुः स्वरूपेऽवस्थानम्'[38] इति न्यायेन द्रष्टा (पुरुष आत्मा वा) स्वस्वरूपे स्थितो भवति। अतो विष्णोर्निद्रानिवृत्तिश्चेतनायाः पूर्णजागरण-मित्यर्थः।

### ९.३ मधुकैटभौ—अविद्यायाः द्विविधशक्त्योः प्रतीकौ

आवरणशक्तिः सत्यं गोपयति; विक्षेपशक्तिश्च मिथ्यासत्तायाः प्रक्षेपं करोति। प्रस्तुते शोधपत्रे प्रस्तूयते यन्मधुकैटभावेतयोरेव शक्त्योः प्रातीकिकं रूपम्—मधुर्मधुरत्वेन आच्छादयन् आवरणशक्तेः, कैटभश्च विक्षोभजनकत्वेन विक्षेपशक्तेः।

गीतायामप्युक्तम्—'माययापहृतज्ञाना आसुरं भावमाश्रिताः'।[39] असुरभावो नाम स भवति यः सत्यचैतन्यस्य ज्ञानमावृणोति। मधुकैटभौ तादृश्यावेवाज्ञानप्रवृत्ती स्तः, यौ चोत्पन्नमात्रौ ब्रह्माणं हन्तुमुद्यतौ—अर्थात् ज्ञानस्रोतसो विनाशाय प्रवृत्तौ।[40]

### ९.४ देव्या जागरणम्—ज्ञानप्रकाशस्योदयः

देवता इन्द्रियाणां मनसश्च जाग्रत्यः शक्तयः। यदा ताः सत्यायाह्वानं कुर्वन्ति, तदा ज्ञानप्रकाशस्योदयो भवति। अत्र ब्रह्मा योगनिद्रां स्तौति—'मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ। प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु॥'[41] सा च विष्णोर्नेत्रास्यनासिकाबाहुहृदयोरोभ्यो निर्गत्य ब्रह्मणो दर्शने तस्थौ, ततश्च जगन्नाथ उत्तस्थौ।[42]

औपनिषदमपि प्रमाणम्—'अविद्यया मृत्युं तीर्त्वा विद्ययामृत-मश्नुते'।[43] एवं देवी विद्यारूपा; तस्याश्च जागरणेन विष्णुश्चेतनारूपः स्वधर्ममारभते।

### ९.५ वधस्याद्वैतार्थः—शरणागतिरहङ्कारविसर्जनं च

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' इति श्रुत्या अविद्यायाः क्षयो ब्रह्मज्ञानेनैव भवतीति सिद्धम्। विष्णुश्चात्र ब्रह्मज्ञानस्य चैतन्यस्य वा प्रतीकः; तस्य जागरणे सत्येव मधुकैटभयोरज्ञानरूपयोर्नाशः सम्भवति।

अत्रैकं सूक्ष्मं तथ्यमवधेयम्—असुरौ स्वयमेव मोहवशाद् भगवन्तं वरं याचयतः ('वरोऽस्मत्तो व्रियताम्'), भगवांश्च तमेव वरं स्ववधरूपेण परिणमयति ('भवेतामद्य मे तुष्टौ मम वध्यावुभावपि')। एवमहङ्कारस्य स्वयंविसर्जनमेव मोक्षद्वारमिति सूच्यते, यदुक्तं गीतायाम्—'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज'।[44]

## १०. उपसंहारः

एवं प्रकारेण 'मधुकैटभवधः' इति नामकं प्रथमं चरित्रं स्वस्याख्यानात्मकस्य बाह्यस्वरूपस्याधस्तादेकां सुसङ्गतां तत्त्व-मीमांसामुपस्थापयति, यस्यां मायाप्रकृतिशब्दब्रह्मशक्तिसम्बन्धिनः सिद्धान्ताः परस्परं गुम्फिताः।

ध्यानश्लोके प्रतिष्ठापिताया ऋषिच्छन्दोदेवतासंरचनाया आरभ्य, सुरथसमाध्योः कथया प्रदर्शितायाः मोहस्य सार्वभौमिकतायाः, मेधसो मुनेरुत्तररूपेण महामायायाः पराविद्यारूपेण प्रतिष्ठापनस्य, अन्ततश्च ब्रह्मणा कृतायां स्तुतौ त्रिदेवानामपि शरीरधारणस्य मूलहेतुरूपेण देव्याः प्रतिष्ठापनस्य—एतानि सर्वाणि सोपानानि मिलित्वास्य चरित्रस्य कृते देवीमाहात्म्यनाम्नः सम्पूर्णस्य ग्रन्थस्यैकस्य 'बीजाध्यायस्य' स्वरूपं प्रयच्छन्ति, यदाधारेणाग्रे मध्यमोत्तमचरित्रयोः सम्पूर्णा गाथा दार्शनिकदृष्ट्याश्रितेव प्रतिभाति।

अतः प्रथमं चरित्रं न केवलमाख्यानम्, अपि तु सम्पूर्णस्य शाक्तदर्शनस्य तत्त्वमीमांसात्मकं प्रवेशद्वारमिति निष्कर्षः।

## सन्दर्भग्रन्थसूची (Bibliography)

### (क) मूलग्रन्थाः / प्राथमिकस्रोतांसि

दुर्गासप्तशती (देवीमाहात्म्यम्), सटीका सभाषानुवादा, गीताप्रेस, गोरखपुर, कोड-सङ्ख्या १०८४। [अस्मिन् शोधपत्रे प्रयुक्तं मूलसंस्करणम्; संस्करणवर्षं स्वप्रयुक्तप्रत्यनुसारेण पूरणीयम्।]

दुर्गासप्तशती सप्तटीकासमलङ्कृता (चतुर्धरी, शान्तनवी, नागोजीभट्टी, जगच्चन्द्रचन्द्रिका, दंशोद्धारा, गुप्तवती, दुर्गाप्रदीपश्चेति टीकासप्तकसहिता), खेमराज श्रीकृष्णदास, वेङ्कटेश्वर प्रेस, मुम्बई। [पाठान्तरनिर्णयार्थम् अनिवार्यं संस्करणम्।]

भास्करराय मखी, गुप्तवती (दुर्गासप्तशतीटीका)।

मार्कण्डेयपुराणम्, नाग पब्लिशर्स, दिल्ली।

पाणिनि, अष्टाध्यायी (सूत्रपाठः), सं. पं. शिवदत्त शर्मा, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी।

पतञ्जलि, व्याकरणमहाभाष्यम्, सं. पं. गुरुप्रसाद शास्त्री, चौखम्बा, वाराणसी।

वामन-जयादित्यौ, काशिकावृत्तिः, चौखम्बा संस्कृत सीरीज, वाराणसी।

भट्टोजि दीक्षित, वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता), मोतीलाल बनारसीदास, दिल्ली।

ईशादिदशोपनिषदः शाङ्करभाष्यसमेताः, मोतीलाल बनारसीदास, दिल्ली।

बादरायणः, ब्रह्मसूत्रम् शाङ्करभाष्यसहितम्, चौखम्बा, वाराणसी।

श्रीमद्भगवद्गीता शाङ्करभाष्यसहिता, गीताप्रेस, गोरखपुर।

पतञ्जलि, पातञ्जलयोगसूत्राणि व्यासभाष्यसहितानि, चौखम्बा, वाराणसी।

गौडपादः, माण्डूक्यकारिका (गौडपादीयकारिका) शाङ्करभाष्य-सहिता, मोतीलाल बनारसीदास, दिल्ली।

सदानन्दयोगीन्द्रः, वेदान्तसारः, अद्वैत आश्रम, कोलकाता।

विद्यारण्यः, पञ्चदशी, अद्वैत आश्रम, कोलकाता।

**(ख) सहायकग्रन्थाः (हिन्दी)**

गोयन्दका, हरिकृष्णदास, श्रीदुर्गासप्तशती (हिन्दी अनुवाद एवं टिप्पणी सहित), गीताप्रेस, गोरखपुर।

उपाध्याय, बलदेव, संस्कृत साहित्य का इतिहास, शारदा निकेतन, वाराणसी।

उपाध्याय, बलदेव, भारतीय दर्शन, शारदा मन्दिर, वाराणसी।

शास्त्री, चारुदेव, व्याकरणचन्द्रोदयः (पञ्च भागाः), मोतीलाल बनारसीदास, दिल्ली।

द्विवेदी, कपिलदेव, रचनानुवादकौमुदी, विश्वविद्यालय प्रकाशन, वाराणसी।

पाण्डेय, रामचन्द्र, शाक्त दर्शन एवं साधना, चौखम्बा विद्याभवन, वाराणसी। [संस्करणविवरणं सत्यापनीयम्।]

**(ग) Secondary Sources (English)**

Coburn, Thomas B. Devī-Māhātmya: The Crystallization of the Goddess Tradition. Delhi: Motilal Banarsidass, 1984.

Coburn, Thomas B. Encountering the Goddess: A Translation of the Devī-Māhātmya and a Study of Its Interpretation. Albany: State University of New York Press, 1991.

Kinsley, David. Hindu Goddesses: Visions of the Divine Feminine in the Hindu Religious Tradition. Berkeley: University of California Press, 1986.

Pintchman, Tracy. The Rise of the Goddess in the Hindu Tradition. Albany: State University of New York Press, 1994.

Brown, C. Mackenzie. The Devī Gītā: The Song of the Goddess. Albany: State University of New York Press, 1998.

Deussen, Paul. The Philosophy of the Upanishads. Trans. A. S. Geden. Edinburgh: T. & T. Clark, 1906.

**पाद टिप्पणी**

1 अस्मिन् शोधपत्रे दुर्गासप्तशत्याः श्लोकसङ्ख्या गीताप्रेस-गोरखपुर-संस्करणानुसारिणी गृहीता, यत्र प्रथमेऽध्याये उवाचवाक्यानि अर्धश्लोकाश्च पृथक् गणिताः सन्तः समुदितसङ्ख्या १०४ भवति। क्रिटिकल-एडिशन-आदिषु सङ्ख्याक्रमो भिद्यते, अतः तुलनाकाले सावधानता अपेक्ष्यते।

2 दुर्गासप्तशती १.५५-५६। द्रष्टव्यम्—अत्र 'ज्ञानिनामपि चेतांसि देवी भगवती हि सा' इति ५५तमस्य उत्तरार्धम्, 'बलादाकृष्य मोहाय महामाया प्रयच्छति' इति च ५६तमस्य पूर्वार्धम्। अतः एतत् प्रमाणं (१.५५-५६) इति निर्देश्यम्, न तु एकश्लोकत्वेन।

3 कठोपनिषत् १.२.५। तुल्यः पाठः—मुण्डकोपनिषत् १.२.८।

4 कठोपनिषत् १.२.२३।

5 श्वेताश्वतरोपनिषत् ३.८।

6 छान्दोग्योपनिषत् ७.२३.१।

7 तैत्तिरीयोपनिषत् ३.६.१।

8 श्रीमद्भगवद्गीता २.५६।

9 श्रीमद्भगवद्गीता २.२०।

10 श्रीमद्भगवद्गीता २.४७।

11 ब्रह्मसूत्रम् १.१.१।

12 ब्रह्मसूत्रम् १.१.२।

13 ब्रह्मसूत्रम् १.१.१२।

14 पातञ्जलयोगसूत्रम् २.२५—'तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्'। पूर्वं मूलप्रारूपे इदं सूत्रं गौडपादभाष्यत्वेन निर्दिष्टमासीत्, तत्तु प्रामादिकम्।

15 मुण्डकोपनिषत् २.२.८।

16 दुर्गासप्तशती १.४१।

17 दुर्गासप्तशती १.४२।

18 दुर्गासप्तशती १.४३।

19 दुर्गासप्तशती १.४४।

20 दुर्गासप्तशती १.४५।

21 दुर्गासप्तशती १.५०।

22 दुर्गासप्तशती १.५१।

23 दुर्गासप्तशती १.५२।

24 दुर्गासप्तशती १.५३।

25 दुर्गासप्तशती १.५३-५४—'तथापि ममतावर्ते मोहगर्ते निपातिताः। महामायाप्रभावेण संसारस्थितिकारिणा॥'

26 दुर्गासप्तशती १.५७-५८। मूलप्रारूपे 'पराविद्या संसारबन्धनस्य मोक्षस्य च हेतुभूता' इति उद्धरणचिह्नान्तर्गतं यत् वाक्यम् आसीत्, तत् वस्तुतः अनुवादः, न तु मूलपाठः; अतः अत्र मूलश्लोक एव उद्धृतः।

27 अत्र देव्याः 'सर्वेश्वरेश्वरी' इति विशेषणं (१.५८) मूलम्। मूलप्रारूपे प्रयुक्तं 'सम्पूर्णेश्वराणामपि अधीश्वरीम्' इति पदं हिन्दी-अनुवादमूलकम्, न तु सांस्कृतमूलपाठः।

28 दुर्गासप्तशती १.८४-८५।

29 दुर्गासप्तशती १.६६-६८। कर्णमलोद्भवनिर्देशः 'विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ' इति ६८तमे प्राप्यते, अतः प्रमाणपरिधिः ६८पर्यन्तं विस्तारणीयः।

30 दुर्गासप्तशती १.६९-७१।

31 दुर्गासप्तशती १.९३-९४—'समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः। पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः॥'

32 दुर्गासप्तशती १.९४-९५।

33 दुर्गासप्तशती १.९७-९८।

34 दुर्गासप्तशती १.१००-१०१।

35 दुर्गासप्तशती १.१०३—'तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता। कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः॥' अत्र मूलपाठे 'जघने' (कटिप्रदेशे) इति पदम्, न तु 'जङ्घायाम्' (जानुनोऽधोभागे); अतः अनुवादे सावधानता आवश्यकी। मूलप्रारूपे अस्य श्लोकस्य पादटिप्पणी लुप्ता आसीत्।

36 'अथात आदेशो नेति नेति' इति बृहदारण्यकोपनिषत् २.३.६। 'स एष नेति नेत्यात्मा' इति तु ३.९.२६ (तथा ४.२.४, ४.४.२२) इत्यत्र। मूलप्रारूपे उत्तरः पाठः पूर्वस्य स्थाने निर्दिष्ट आसीत्।

37 अद्वैतसिद्धान्ते अज्ञानस्य आवरणविक्षेपलक्षणे द्वे एव शक्ती स्वीकृते। द्रष्टव्यम्—सदानन्दयोगीन्द्रकृतः वेदान्तसारः, अज्ञाननिरूपणप्रकरणम्; विद्यारण्यकृता पञ्चदशी १.१५-२०। मूलप्रारूपे क्वचित् 'अज्ञानम्, आच्छादनम्, विक्षेपः' इति त्रिविधशक्तिः, क्वचिच्च द्विविधशक्तिः उक्ता, तत् परस्परविरुद्धम् आसीत्; अत्र तत् सम्पादितम्।

38 पातञ्जलयोगसूत्रम् १.३।

39 मूलपाठे 'आसुरम्' इति (असुर + अण्, 'तस्येदम्' पा.सू. ४.३.१२०), न तु 'असुरम्'।

40 अत्र सावधानता अपेक्ष्यते—वेदापहरणप्रसङ्गो मधुकैटभयोः विषये भागवतादिषु पुराणेषु प्राप्यते; देवीमाहात्म्ये तु तौ 'हन्तुं ब्रह्माणमुद्यतौ' (१.६८) इत्येव वर्णितौ, न तु वेदापहर्तारौ। अतः पाठान्तरसङ्करः परिहर्तव्यः।

41 दुर्गासप्तशती १.८६-८७।

42 दुर्गासप्तशती १.९०-९१।

43 ईशोपनिषत् ११—'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते'। मूलप्रारूपे इदं वाक्यं केनोपनिषत् २.४ इति निर्दिष्टमासीत्, तत् प्रमादः; केनोपनिषत् २.४ तु 'प्रतिबोधविदितं मतममृतत्वं हि विन्दते' इति।

44 श्रीमद्भगवद्गीता १८.६६—'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज'। अत्र 'मामेकम्' इति सन्धियुक्तः पाठः, न तु 'मां एकम्'।